# Narayanottaratapiniya Upanishad

# નારાયણોત્તરતાપિનીયોપનિષત્

## Document Information

Text title : nArAyaNottaratApinIyopaniShat

File name : nArAyaNottaratApinIyopaniShat.itx

Category : upanishhat, vishhnu, upanishad

Location : doc_upanishhat

Proofread by : Kasturi navya sahiti kasturinsahiti at gmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : March 20, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 20, 2020

*sanskritdocuments.org*

# નારાયણોત્તરતાપિનીયોપનિષત્

## પ્રથમઃ ખણ્ડઃ ।

સ હોવાચ ભગવાન્ બ્રહ્મા આનન્દં બ્રહ્મણો વિદ્વાન્
સચ્ચિદાનન્દમ્બરૂપો ભવતિ ।
દ્વા સુપર્ણા સયુજા સખાયા સમાનં વૃક્ષં પરિષસ્વજાતે ।
તયોરન્યઃ પિપ્પલં સ્વાદ્વત્ત્યનશ્નન્નન્યો અભિચાકશીતિ ॥

યો વેદાદૌ સ્વરઃ પ્રોક્તો વેદાન્તે ચ પ્રતિષ્ઠિતઃ ।
તસ્ય પ્રકૃતિલીનસ્ય યઃ પરઃ સ મહેશ્વરઃ ॥

અણોરણીયાન્મહતો મહીયાનાત્મા ગુહાયાં નિહિતોઽસ્ય જન્તોઃ ।
તમક્રતું પશ્યતિ વીતશોકો ધાતુઃ પ્રસાદાન્મહિમાનમીશમ્ ॥

વાસનાદ્વાસુદેવસ્ય વાસિતં હિ જગત્ત્રયમ્ ।
સર્વભૂતનિવાસોઽસિ વાસુદેવ નમોઽસ્તુ તે ॥

ભૂશ્ચ નારાયણઃ । ભુવશ્ચ નારાયણઃ । સુવશ્ચ નારાયણઃ ।
મહશ્ચ નારાયણઃ । જનશ્ચ નારાયણઃ । તપશ્ચ નારાયણઃ ।
સત્યં ચ નારાયણઃ । નારાયણઃ પરં બ્રહ્મ । નારાયણ એવેદં સર્વમ્ ।
નારાયણાન્ન કિઞ્ચિદસ્તિ । સત્યં જ્ઞાનમનન્તં બ્રહ્મ । યો વેદ નિહિતં
ગુહાયાં પરમે વ્યોમન્ । તસ્માદ્વા એતસ્માદાત્મન આકાશઃ સમ્ભૂતઃ ।
આકાશાદ્વાયુઃ । વાયોરગ્નિઃ । અગ્નેરાપઃ । અદ્ભ્યઃ પૃથિવી । પૃથિવ્યા
ઓષધયઃ । ઓષધીભ્યોઽન્નમ્ । અન્નાત્પુરુષઃ । નારાયણઃ સર્વપુરુષ
એવેદં પરબ્રહ્મ । નારાયણઃ સર્વભૂતાન્તર્યામ્યાત્મા । આત્મેદં સર્વં
નારાયણઃ । નારાયણઃ સ્વયં જ્યોતિઃ । તસ્માત્પ્રકાશાત્મા ॥

નીવારશૂકવત્તન્વી પીતા ભાસ્વત્યણૂપમા ।
તસ્યાઃ શિખાયા મધ્યે પરમાત્મા વ્યવસ્થિતઃ ॥

પાશબદ્ધઃ સ્મૃતો જીવઃ પાશમુક્તઃ સનાતનઃ ।

તુષેણ બદ્ધો વ્રીહિઃ સ્યાત્તુષાભાવેન તણ્ડુલ ॥

પરબ્રહ્મ સ્વયં ચાત્મા સાક્ષાન્નારાયણઃ સ્મૃતઃ ।
નારાયણમનાદિં ચ યોગનિદ્રાપરાયણમ્ ॥

જાગ્રત્સ્વપ્નસુષુમીષુ સર્વકાલવ્યવસ્થિતમ્ ।
નારાયણં મહાત્માનં મહાધ્યાનપરાયણમ્ ।
સર્વવેદાન્તસંલક્ષ્યં તદ્બ્રહ્મેત્યભિધીયતે ॥

સ હોવાચ ભગવાન્ નારાયણ એવેદં સર્વં પ્રતિષ્ઠિતં ય એવં વેદ ।
ઇત્યુપનિષત્ ॥

ઇત્યાથર્વણરહસ્યે નારાયણોત્તરતાપિનીયે પ્રથમઃ ખણ્ડ ।

## દ્વિતીયઃ ખણ્ડઃ ।

સ હોવાચ ભગવાન્ બ્રહ્મા નારાયણઃ પરવસ્તુ ભવતીતિ વિજ્ઞાયતે ।
સચ્ચિદાનન્દરૂપાય જ્ઞાનાયામિતતેજસે ।
પરબ્રહ્મસ્વરૂપાય નારાયણ નમોઽસ્તુ તે ॥

નિત્યશુદ્ધાય બુદ્ધાય નિત્યાયાદ્વૈતરૂપિણે ।
આનન્દાયાત્મરૂપાય નારાયણ નમોઽસ્તુ તે ॥

ૐ નમો ભગવતે શ્રીમન્નારાયણાય મહાવિષ્ણવે અમિતબલપરાક્રમાય
શઙ્ખચક્રગદાધરાય લક્ષ્મીસમેતાય ગરુડવાહનાય દશાવતારાય
સર્વદુષ્ટદૈત્યદાનવસંહરણાય શિષ્ટપ્રતિપાલકાય પરબ્રહ્મરૂપાય
મહાત્મને પરમપુરુષાય પુણ્ડરીકાક્ષાય પુરાણપુરુષાય શુદ્ધબુદ્ધાય
સચ્ચિદાનન્દસ્વરૂપાય મહાત્મને ઘૃણિઃ સૂર્ય આદિત્ય ૐ નમો નારાયણાય
સહસ્રાર હું ફટ્ સ્વાહા ॥

નારાયણાય શાન્તાય શાશ્વતાય મુરારયે ।
યજ્ઞેશ્વરાય યજ્ઞાય શરણ્યાય નમો નમઃ ॥

સ હોવાચ ભગવાન્ બ્રહ્મા સર્વં વિશ્વમિદં નારાયણઃ ય એવં વેદ ।
ઇત્યુપનિષત્ ॥

ઇત્યાથર્વણરહસ્યે નારાયણોત્તરતાપિનીયે દ્વિતીયઃ ખણ્ડ ।

## તૃતીયઃ ખણ્ડઃ ।

સ હોવાચ ભગવાન્ બ્રહ્મા નારાયણઃ પરબ્રહ્મેતિ ય એવં વેદ ।
નારાયણાત્મા વેદં સર્વં નિર્વિકારં નિરઞ્જનવસ્તુ પ્રતિપાદ્યતે ।
સ નારાયણો વિરાટ્પુરુષો ભવાતિ । દેવાનાં વાસવો ભવતિ । ઇન્દ્રિયાણાં મનો
ભવતિ । સર્વેષાં વસ્તૂનાં મુખ્યવસ્તુ ભવતિ । ॐ નમો નારાયણાદન્યો
મન્ત્રઃ નારાયણાદન્યોપાસ્તિર્નાસ્તિ । નાન્યન્નારાયણાદુપાસિતવ્યમ્ । સર્વં
નારાયણ એવ ભવતીતિ વિજ્ઞાયતે । યોઽધીતે નિત્યં સર્વાન્ કામાનવાપ્નોતિ ।
સ બ્રહ્મહત્યાયાઃ પૂતો ભવતિ । સુરાપાનાત્ પૂતો ભવતિ । સ્વર્ણસ્તેયાત્
પૂતો ભવતિ । ગુરુતલ્પગમનાત્ પૂતો ભવતિ । અગમ્યાગમનાત્ પૂતો ભવતિ ।
અભક્ષ્યભક્ષાત્ પૂતો ભવતિ । સ ઉપપાતકમહાપાતકેભ્યઃ પૂતો ભવતિ ।
સર્વવેદમધીયાનો ભવતિ । સર્વક્રતુફલં પ્રાપ્નોતિ । સર્વકર્મકર્તા
ભવતિ । ચતુઃસમુદ્રપર્યન્તભૂદાનફલં પ્રાપ્નોતિ । દ્વિજોત્તમો ભવતિ ।
ચતુર્વર્ગફલં પ્રાપ્નોતિ । બ્રહ્મચારી જ્ઞાનવાન્ ભવતિ । ગૃહી
પુત્રપૌત્રમહૈશ્વર્યવાન્ ભવતિ । સંન્યાસઈ મોક્ષવાન્ ભવતિ ॥

પઠનાચ્છ્રવણાદ્વાઽપિ સર્વાન્ કામાનવાપ્નુયાત્ ।
નારાયણપ્રસાદેન વૈકુણ્ઠપદમશ્નુતે ॥

ઇતિ સ હોવાચ ભગવાન્ ય એવં વેદ । ઇત્યુપનિષત્ ॥

વેદાક્ષરાણિ યાવન્તિ પઠિતાનિ દ્વિજોત્તમૈઃ ।
તાવન્તિ હરિનામાનિ કીર્તિતાનિ ન સંશયઃ ॥

નારાયણ હરે કૃષ્ણ વાસુદેવ જગદ્ગુરો ।
મુકુન્દાચ્યુત દેવેશ મહાવિષ્ણો નમોઽસ્તુ તે ॥

ભૂતાનિ તત્ત્વસંજ્ઞાનિ કૂટસ્થોઽક્ષરસંજ્ઞિતઃ ।
ઉત્તમશ્ચાપિ પુરુષો નારાયણ ઇતીર્યતે ॥

ઇત્યાથર્વણરહસ્યે નારાયણોત્તરતાપિનીયે તૃતીયઃ ખણ્ડઃ
(વૈષ્ણવ-ઉપનિષદઃ)

ઇતિ નારાયણોત્તરતાપિનીયોપનિષત્ સમાપ્ત ।

Proofread by Kasturi navya sahiti

*Narayanottaratapiniya Upanishad*

pdf was typeset on March 20, 2020

Please send corrections to *sanskrit@cheerful.com*